**विशद** पु॰ वि+शद-अच् । १शुभ्रवर्णे २तद्वति त्रि॰ अमरः । ३विमले हेम॰। ४व्यक्ते च त्रि॰ मेदि॰ । [मीमांसा ।

**विशय** पु॰ वि+शी-अच् । संशये “विषयो विशयश्चैवेति”

**विशर** पु॰ वि+शॄ-अच् । १वधे अमरः । प्रादि॰ब॰। २विगत-वाणे त्रि॰ ।

**विशल्यकृत्** पु॰ विशल्यं तत्प्रहारवेदनानिवृत्तिं करोति कृ-क्विप् । (हापरमाली) १वृक्षे रत्नमा॰ । २विशल्य-कारके त्रि॰ ।

**विशल्यकरणी** स्त्री विशल्यं क्रियतेऽनया कृ-ल्युट् ङीप् । ओषधिभेदे “पूर्वं तु कथिता याऽसौ वीर ! जाम्बवता तव । दक्षिणे शिखरे जातां महौषधिमिहानय । विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा । संजीव करणीं वीर ! सन्धानीञ्च महौषधिम्” रामा॰ लङ्का॰ १०२स॰ ।

**विशल्या** स्त्री विगतं शल्यं तत्प्रहारवेदना यस्याः ५ब॰ । १अग्निशिखवृक्षे २दन्तीवृक्षे ३गुडूच्याम् अमरः ४त्रि-पुट्याम् ५अजमोदायाञ्च राजनि॰ ।

**विशसन** न॰ वि+शस-हिंसने ल्युट् । १मारणे अमरः । करणे ल्युट् । २खड्गे पु॰ त्रिका॰ “असिर्विशसनः खड्गः” खगडपूजामन्त्रः ।

**विशस्त** त्रि॰ वि+शस-अविनये न इट् अन्यत्र इट् । धृष्टे सि॰ कौ॰ । इटि विशसित । मारिते त्रि॰ ।

**विशस्तृ** पु॰ वि+शस-तृच् न इट् । चण्डाले संक्षिप्त॰ ।

**विशाकर** पु॰ विशाकः विगतशाकः सन् राजते राज-बा॰ ड । भद्रकुडे (लङ्काशिज) शब्दच॰ । तस्य शाकशून्यत्वात् तथात्वम् ।

**विशाख** पु॰ विशिष्टा शाखाऽस्य । १कार्त्तिकेये २धन्विनां वि-तस्त्यन्तरालपादावस्थाने अमरः । ३पुनर्नवायां राजनि॰ ४याचके च मेदि॰ । ५स्कान्दांशजाते देवभेदे तन्नामनि-रुक्तिः भा॰व॰२२६अ॰ उक्ता यथा “वज्रप्रहारात् स्कन्दस्य संजातः पुरुषोऽपरः । युवा काञ्चनसन्नाहः शक्तिधृग् दिव्य-कुण्डलः । यद्वज्रवेशनाज्जातो विशाखस्तेन कीर्त्तितः” । ६स्कन्दानुजभ्रातरि “अग्नेः पुत्रः कुमारस्तु श्रीमान् शरवनालयः । तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः” भा॰ आ॰ ६६अ॰ । ७शिवे भा॰अा॰ १७अ॰ ।

**विशाखज** पु॰ विशिष्टा शाखा यस्य तथा सन् जायते जन-ड । नारङ्गे शब्दच॰ [शब्दमालोक्ते धन्विनामवस्थानभेदे ।

**विशाखल** न॰ “विशालान्तरविन्यस्ते पादयुग्मे विशाखलम्”

**विशाखा** स्त्री विशिष्टा शाखा प्रकारो यस्याः । १बहुल-नक्षत्रात्मकेऽश्विन्यवधिके षोडशे नक्षत्रे अमरः । “विशा-खयोर्मध्यगतः सम्पूर्ण इव चन्द्रमा” रामा॰ प्रयोगात् तस्य द्विवचनान्ततेत्यन्ये । “बहुपुत्रो विशिखासु” भा॰ आ॰ ६ उक्तेर्बहुत्वं बहुतारात्मकत्वेनेति बोध्यम् । अस्ल शाब्दे ४९७ पृ॰ दृश्यम् । २कठिल्लके मेदि॰ ।

**विशाय** पु॰ वि+शी-पर्य्याये घञ् । प्रहरिणां पर्य्यायेण शयने अमरः ।

**विशारण** न॰ वि+शॄ-स्वार्थे णिच्-ल्युट् । मारणे हेमच॰ ।

**विशारद** पु॰ विशालं ददाति दा-क लस्य रः । १बकुलवृक्षे २क्षुद्रदुरालभायां स्त्री राजनि॰ । ३पण्डिते पु॰ ४प्रगल्भे त्रि॰ अमरः ५श्रेष्ठे च त्रि॰ अजयः ।

**विशाल** त्रि॰ वि+शालच् । १विस्तीर्णे २वृहति च अमरः । २मृगभेदे ३खगभेदे पुंस्त्री॰ मेदि॰ स्त्रियां ङीष् । ४नृपभेदे पु॰ ५वृक्षभेदे शब्दर॰ । ६इन्द्रवारुण्याम् स्त्री अमरः । ७माहेन्द्रवारुण्याम् ८उपोदक्यां च स्त्री राजनि॰ । ९उज्जयिनीनगर्य्यां स्त्री मेदि॰ । १०नदीभेदे च स्त्री “विशालां विरजां तथा” सुखडनोपवासपर्यु-दासः विरजाशब्दे दृश्यः । [२वृहत्त्वे शब्दर॰

**विशालता** स्त्री विशालस्य भावः तल् । १पार्श्वविस्तारे अमरः

**विशालतैलगर्भ** पु॰ विशालं विस्तीर्णं तैलं गर्भे फलमध्ये यस्य । अङ्कोटकवृक्षे राजनि॰ । [अमरः ।

**विशालत्वच्** पु॰ विशाला त्वक् यस्य । सप्तच्छदवृक्षे ।

**विशालपत्र** पु॰ विशालं पत्रमस्य । १कामालौ, २श्री-तालवृक्षे च राजनि॰ ।

**विशालाक्ष** पु॰ विशाले अक्षिणी यस्य षच्समा॰ । १महादेवे, २गरुडे, ३विष्णौ च ४वृहन्नेत्रे, त्रि॰ मेदि॰ । ५पार्वत्यां ६नागदन्त्यां च स्त्री राजनि॰ ङीष् । ७वरस्त्रियां स्त्री विश्वः । ८योगिनीभेदे स्त्री । [राजनि॰ ।

**विशाली** स्त्री॰ वि+शालच् गौरा॰ ङीष् । अजमोदायाम् ।

**विशिख** पु॰ विशिष्टा विगता वा शिखा यस्य प्रादि॰ ब॰ । १शरवृक्षे राजनि॰ । २वाणे अमरः । ३तोमरे च मेदि॰ । ४शिखारहिते त्रि॰ । ५खनित्र्यां ६नालिकायाम् ७रथ्यायाञ्च स्त्री॰ मेदि॰ ।

**विशिप** न॰ विश-इपक् । मन्दिरे उणादिको॰ [युक्ते च ।

**विशिष्ट** त्रि॰ वि+शिष-क्त । १युक्ते २विलक्षणे ३विशेषणा-

**विशिष्टबुद्धि** स्त्री ६त॰ । विशेषणवतो विशेष्यस्य ज्ञाने यथा घट इत्यादिकं ज्ञानम् अत्र घटत्वस्य विशेषणतया भास॰